**गञ्जोल** पु० गोमेदरत्ननामके मणिभेदे हारावली ।

**गच्छ** पु० गम–सम्प०क्विप् मलोपे तुक् च गतं गतिं छ्यति छो–क । १इत्ते त्रिका० । लीलावत्युक्ते श्रेढीव्यवहारे प्रवृत्तगत्यादिक्रियाविरतिकारके २पदसंज्ञे स्थाने पु० । तज्ज्ञानार्थं तत्राह “श्रेढीफलादुत्तरलोचनघ्नाच्चयार्द्धवच्चान्तरवर्गयुक्तात् । मूलं सखोनं चयखण्डयुक्तं चयोद्धृतं गच्छमुदाहरन्ति । उदाहरणम् । द्रम्मत्रयं यः प्रथमेऽह्नि दत्त्वा दातुं प्रवृत्तोद्विचयेन तेन । शतत्रयं षष्ट्यधिकं द्विजेभ्यो दत्तं कियद्भिर्दिवसैर्वदाशु । न्यासः आदिः० । ३ । चयः । २ । गच्छः ।०। सर्वधनं ३६०। लब्धो गच्छः१८ । अथ द्विगुणोत्तरादिफलानयने करणसूत्रं सार्द्धवृत्तम् । विषमे गच्छे व्येके गुणकः स्यात्समेऽर्द्धिते वर्गः । गच्छक्षयान्त्यमन्त्याद्व्यस्तं गुणवर्गजं फलं यत्तत् । व्येकं व्येकगुणोद्धृतमादिगुणं स्याद्गुणोत्तरे गणितम् । उदाहरणम् । पूर्वं वराटकयुगं येन द्विगुणोत्तरं प्रतिज्ञातम् । प्रत्यहमर्थिजनाय स मासे निष्कान् ददाति कति । न्यासः आदिः । २ । चयो-द्विगुणः २। गच्छः । ३० । लब्धावराटकाः । २१४७४८३६४६ । निष्काः षोडशद्रम्मैः...प्राप्ता जाता निष्काः । १०४८५७ । द्रम्माः । ८ । पणाः । ८ । काकिण्यौ । २ । वराटकाः । ६ । उदाहरणम् । आदिर्द्विकं सखे ! वृद्धिः प्रत्यहं त्रिगुणोत्तरा । गच्छः सप्तदिनं यत्र गणितं तत्र किं वद । न्यासः । आदिः । २ । चयोगुणः ३ । गच्छः । ७ । लब्धं गणितम् । २१८६” शब्दकल्पद्रुमे निर्विसर्गगच्छेत्यस्य विभक्त्यन्तस्य शब्दत्वकल्पनेनार्थकथनमतीव हास्यास्पदम् गच्छेत्यस्य विभक्त्यन्ततया पदत्वेन शब्दत्वाभावात् अन्यथा नानाविभक्तियोगेन नानाशब्दार्थकथनापत्तेः ।

**गज** मदे खने च भ्वा० पर० अक० सेट् । गजति अगाजीत् अजगीत् । जगाज । गजः ।

**गज** खने भ्वा० इदित् पर० अक० सेट् । गञ्जति अगञ्जीत् । जगञ्ज । गञ्ज्यते । गञ्जा । [ जत् त ।

**गज** खने चुरा० उभ० अक० सेट् । गजयति ते अजगज

**गज** पुंस्त्री० गज–मदे अच । १हस्तिनि “नगजा न गजा दयिता दयिताः” भट्टिः । इभशब्दे विवृतिः । स्त्रियां जातित्वात् ङीष् । २अष्टसंख्यायाम् गजानामैरावतादीनामष्टत्वात् तथात्वम् । “कृत्वा त्रिघ्नं गजैर्हृत्वा” ज्यो० त० “गजभुक्तशेषम्” तन्त्रसा० । “अरत्नीनां शतान्यष्टाबेकषष्ट्यान्वितानि च । गजप्रमाणमाख्यातं मुनिभिर्मानवेदिभिः” शब्दार्थचि० उक्ते ३मानभेदे । “साधारणनराङ्गुल्या त्रिंशदङ्गुलको गजः” इत्युक्ते ४मानभेदे । ५मानमात्रे ६वास्तुमानभेदे च मेदि० । स च ज्यो० त० उक्तः यथा “प्रस्तारदैर्घ्यं मानं तु स्वहस्तेन तथा नरैः । कृत्वा त्रिघ्नं गजैर्हृत्वा वास्तुमाननिरूपणम् । ध्वजो धूमश्च सिंहश्च श्वा वृषः खर एव च । गजः काकपदं चैव मानान्यष्टौ च वास्तुनः” ज्यो० त० । “पुष्टिर्गजे काकपदे विनाशः” तत्फलम् ७औषधपाकार्थे गर्त्तभेदे वैद्यकम् गजपुटशब्दे दृश्यम् । गजानां समूहः तल् । गजता तत्समूहे स्त्री । ततः ऊर्द्धमाने दघ्नच्, गजदघ्न, द्वयसच्, गजद्वयस, गजतुल्योर्द्धपरिमाणे त्रि० । स्त्रियां ङीप् । “द्वितीयस्य तृतीयस्य ऊर्द्धमाने मतौ मम” व्या० का० उक्तेः ऊर्द्धमान एव तयोः प्रयोगः । परिमाणमात्रे तु मात्रच् । गजमात्र इत्येव त्रि० । [हस्तिकन्दे इत्ते राजनि

**गजकन्द** पु० गजो गजदन्त इव कन्दोऽस्य । (हातिकाँदा)

**गजकर्ण** पु० गजस्य कर्ण इव कर्णोऽस्य । १यक्षभेदे “कुसुम्बरुः पिशाचश्च गजकर्णो विशालकः” भा० स० १० अ० । यक्षकथने । २औषधिभेदे स्त्री ङीप् । “गजकर्णी तु तिक्तोष्णा तथा वातकफान् जयेत् । शीतज्वरहरा स्वादुः पाके तस्यास्तु कन्दकः । पाण्डुरोगकृमिप्लीहागुल्मानाहोदरापहः । ग्रहण्यर्शोविकारघ्नो वनसूरणकन्दवत्” भावप्र० ।

**गजकूर्माशिन्** पु० गजश्च कूर्मश्च तौ अश्नाति अश–भोजने णिनि । १गरुडे शब्दरत्ना० गजकच्छपभोजोत्पादयोऽप्यत्र । तौ च विभावसुप्रतीकमुनी अन्योन्यशापाद् गजकूर्मतां प्राप्तौ गरुडेन भक्षितौ यथाह भा० आ० २९ अ०

“आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम् । भ्राता तस्यानुजश्चासीत् सुप्रतीको महातपाः । स नेच्छति धनं भ्राता सहैकस्थं महामुनिः । विभागं कीर्त्तयत्येव सुप्रतीको हि नित्यशः । अथाब्रवीच्च तं भ्राता सुप्रतीकं विभावसुः । विभागं बहवो मोहात् कर्त्तुमिच्छन्ति नित्यशः । ततो विभक्तास्त्वन्योऽन्यं विरुध्यन्तेऽर्थमोहिताः । ततः स्वार्थपरान् मूढान् पृथग्भूतान् स्वकैर्धनैः । विदित्वा भेदयन्त्येतानमित्रा मित्ररूपिणः । विदित्वा चापरे भिन्नानन्तरेषु पतन्त्यथ । भिन्नानामतुलो नाशः क्षिप्रमेव प्रवर्त्तते । तस्माद्विभागं